# श्रीसुरसरस्वतीसभा शृङ्गेरी

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः - 06-09-2026 | अङ्काः - 100

पूर्वाह्णे - 10:00 वादनतः 1:00 वादनपर्यन्तम् | समयः - घण्टात्रयम्

सूचना - सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1 पञ्चानाम् एकवाक्येन उत्तरं लिखत ।** **5**

१. स्त्रीपुंसौ कस्य आत्मभागौ ?

२. आनन्दगिरिः कः ?

३. ‘रघोरौदार्यम्’ इति पाठः कस्मात् ग्रन्थात् कस्माच्च भागात् उद्धृतः ?

४. कः शङ्करैकभावं कलयति ?

५. भारताचार्यः कः ?

६. रुमण्वान् कः ?

७. यौवनवती दमयन्ती कस्मिन् मनो बबन्ध ?

८. विद्या केषु पूज्यते ?

**2 पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **10**

१. कुन्त्याः सेवया प्रीतो दुर्वासाः तां किमाह ?

२. कूपे समुद्रे च तुल्यं जलं गृहणन् घटः किमुपदिशति ?

३. ‘मा भूत् परीवादनवावतारः’ - कीदृशः सः परीवादः ?

४. शङ्कर इति नाम कथं सार्थकम् आसीत् ?

५. अम्बरस्थः चन्द्रः कथं बभ्राज ?

६. एकचक्रनगरे वसतः पाण्डवान् यदृच्छयागतो विप्रः किमुवाच ?

७. सुरेश्वरः वार्तिकं रचयितुकामो भगवत्पादं किमभ्यर्थयामास ?

**3 द्वयोः विस्तरेण (सप्ताष्टैर्वाक्यैः) उत्तरं लिखत ।** **8**

१. देवैः कृतां विष्णुस्तुतिं पाठानुसारेण वर्णयत ।

२. गिरिः गुरुसेवां कथं विदधौ ?

३. भगवता वेदव्यासेन उक्तं द्रौपद्याः पूर्ववृत्तान्तं वर्णयत ।

४. हस्तिनापुरमागतान् पाण्डवान् दृष्ट्वा नागराः किमतर्कयन् ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. शरद्घनं नार्दति चातकोऽपि ।

२. विपक्वं फलमद्य नः ।

३. शीर्षेऽस्य व्यरचि रयेण पुष्पवृष्टिः ।

४. आवयोः साङ्ग्रामिकमुपकरणं सम्पादय ।

५. राजन्! तव शापस्य विमोचनकालः सन्निहितः ।

**5 द्वयोः भावं विशदयत ।** **8**

१. आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥

२. पुत्रांस्ते बहुवयसो बहून् किमज्ञान् एकं वा लघुवयसं ददामि सूनुम् ।
सर्वज्ञं तमिति शिवेन पृच्छ्यमानस्त्वस्त्वेकः सकलविदित्युवाच विप्रः ॥

३. सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात्तव ॥

४. या भाति लक्ष्मीर्भुवि मन्दरस्था तथा प्रदोशेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था रराज सा चारु निशाकरस्था ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. एते .................. जानीमहे ॥

२. यावत् .................. कीदृशः ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** **4**

१. कालिदासः २. लक्ष्मणशास्त्री

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **8** | **एकस्य लघुटिप्पणीं लिखत ।** | | | | | | **4** |
| १. | पाण्डुः | २. | उदयनस्य औदार्यम् | | | | |
| **9** | **चत्वारि पदानि वाक्ये योजयत ।** | | | | | | **4** |
| १. | कलत्रम् | २. | सप्तार्चिः | ३. | पाहि | | |
| ४. | आरात् | ५. | अलम् | ६. | चरणारविन्दे | | |
| **10** | **चतुर्णां रूपाणि विवेचयत ।** | | | | | | 4 |
| १. | कृतिनाम् | २. | असहमानः | ३. | सपदि | | |
| ४. | प्रीतिकण्टकितत्वचः | ५. | आयुः | ६. | मन्येत | | |
| **11** | **चतुर्णां पर्यायपदानि लिखत ।** | | | | | | **4** |
| १. | अरुजम् | २. | सुदती | ३. | अञ्जसा | | |
| ४. | विशाम्पतिः | ५. | जिष्णुः | ६. | कुलीरः | | |
| **12** | **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** | | | | | | **4** |
| १. | प्राप्तयौवनः | २. | निद्रालस्ये | ३. | पुण्डरीकाक्षः | | |
| ४. | विदर्भराजनगरम् | ५. | मदान्धः | ६. | अध्यात्मम् | | |
| **13** | **चतुर्णां सन्धिं विभज्य नाम लिखत ।** | | | | | | **4** |
| १. | अध्यापयन्नधीश्वरः | २. | पूरयिष्यतीति | ३. | कालस्सन्निहितः | | |
| ४ | भगवत्पादोऽप्यान्तम् | ५. | विहरंस्तस्याम् | ६. | निश्चिन्वेकत्र | | |
| **14** | **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** | | | | | | **6** |
| १. | जज्ञे | २. | ददामि | ३. | प्रतिपद्यस्व | ४. | आह |
| **15** | **द्वयोः व्याकरणविशेषं लिखत ।** | | | | | | **4** |
| १. | अर्घ्यम् | २. | व्यजयत | ३. | यादृच्छिकः | ४. | अर्थ्याः |
| **16** | **समासमेकं सलक्षणं विशदयत ।** | | | | | | **4** |
| १. | तत्पुरुषसमासः | २. | अव्ययीभावसमासः | | | | |

**17 चतुर्थं पदं लिखत ।** **4**

| | | | | | |
|---|---|---|---|---|---|
| १. | कृतवर्मा | - विष्णुमती | :: | भीमः - | ____________ |
| २. | भर्तृहरिः | - नीतिशतकम् | :: | अनन्ताचार्यः - | ____________ |
| ३. | कौत्सः | - वरतन्तुः | :: | धृष्टद्युम्नः - | ____________ |
| ४. | हैडिम्बेयः | - तद्धितान्तः | :: | पञ्चनली - | ____________ |

**18 इतरवचनानि लिखत ।** **4**

| | | | |
|---|---|---|---|
| १. | _________ | _________ | कृताश्वासाः । |
| २. | आह | _________ | _________ । |
| ३. | अर्हन् | _________ | _________ । |
| ४. | _________ | यमलौ | _________ । |

**19 रिक्तस्थानानि पूरयत ।** **4**

१. ववार च सुतापाणिग्रहणाय ______________ ।

२. भोः कुमाराः! पश्यत मे ______________ ।

३. भो राजन्! मा मां ______________ ।

४. गुरो! ______________ गिरेरस्ति भवति भक्तिः ।

**20 प्रयोगपरिवर्तनं कुरुत ।** **2**

१. यः तव चेतसि वर्तते ।

२. पञ्च पाण्डवाः अजायन्त ।

-------------------------